ISSN : 2583-2271
Vol. - I, No. 1: 2021

# श्रीशिवरामेन्द्रसरस्वतीविरचितरत्नप्रकाशदिशा कारके इति सूत्रार्थविचारः

**सुकान्त मान्ना**


## प्रबन्धसारः

*महाभाष्यप्रदीपव्याख्यानानि इति ग्रन्थः एम्. एस्. नरसिंहाचार्यैः त्रिसप्तत्यधिक-नवदशतमे ईशवीयाब्दे सम्पादितः पण्डिचेरीस्थ-फ्रेन्च-इन्स्टिटिउट्-संस्थाद्वारा प्रकाशितः। अस्मिन् ग्रन्थे महाभाष्यप्रदीपयोः प्रायः नव व्याख्यानानि वर्तन्ते। तेषु महाभाष्यसिद्धान्तरत्नप्रकाशः इत्याख्या व्याख्या विशिष्टा। अस्य ग्रन्थस्य कर्ता श्रीहरिहरेन्द्रभगवत्पादशिष्यः श्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रः। तेषां विषये तथा अधिकं तथ्यं न लभ्यते। युधिष्ठिरमीमांसकानां मते एतेषां कालः १६०० वर्षात् परमस्ति। ततोऽधिकम् एतेषां विषये नोपलभ्यते।*

*इदं व्याख्यानम् अन्येभ्यः व्याख्यानेभ्यः नितरां विलक्षणं वर्तते। व्याख्यानानि सामान्यतः व्याख्येयग्रन्थार्थप्रकाशाय प्रवर्तन्ते। तत्रत्यानां पङ्क्तीनाम् आशयप्रकाशनं कुर्वति क्वचित् मतभेदे सति तम् अंशम् उल्लिखति। किन्तु भाष्यव्याख्याभूतः अयं ग्रन्थः न तथा। अस्य प्रदीपखण्डने एव महती रुचिः। प्रायः प्रतिपङ्क्ति प्रदीपस्य खण्डनमेव दृश्यते। भाष्यपङ्क्त्यर्थं स्वमतानुकूलेन व्याख्याय ततःपरं तद्व्याख्याभूतप्रदीपपङ्क्तीम् उद्धृत्य खण्डयति व्याख्याकारः। अस्मिन् पत्रे मया कारके इति सूत्रविषये तेषाम् आचार्याणां यत् मतं तस्य युक्तायुक्तविचारः क्रियते।*

***दृष्टान्तः***

*कारके इत्यत्र किमिदमिति प्रश्नस्य उत्तरत्वेन भाष्यकारेण उक्तं संज्ञानिर्देशः इति। अर्थात् कारके इत्यनेन कारकसंज्ञानिर्देशः क्रियते। ततः पुनः प्रश्नः कृतः यत्- किं वक्तव्यमेतदिति। तस्य उत्तरं दत्तम्- न हि, इह हि व्याकरणे इत्यादि। किं वक्तव्यमेतद् इति प्रश्नः कुतः उद्भूतः इत्यत्रैव कैयटरत्नप्रकाशकारयोः मतभेदः। कैयटस्य आशयः- यत्र यत्र संज्ञापदनिर्देशः तत्र तत्र प्रथमान्तेनैव निर्देशः दृश्यते इति प्रश्नस्य बीजम्। कारके इति तु सप्तम्यन्तमिति तस्य पृथक् निर्देशः कर्तव्यो न वा इति प्रश्नाशयः। रत्नप्रकाशकारस्य तु एतावत् पर्यन्तं यत्र यत्र संज्ञानिर्देशः तत्र तत्र संज्ञिनिर्देशः। कारके इत्यत्र संज्ञामात्रनिर्देशात् प्रश्नः जायते इति। किं प्रकृतेऽपि संज्ञिनिर्देशः कर्तव्यः न वा इत्येव प्रश्नाशयः इति फलति। किन्तु रत्नप्रकाशकारेण यथा प्रतिपादितं तन्न युक्तमिति मे मतम्। यतो हि भाष्यकारेण न हि, इह हि व्याकरणे इत्यादिना उत्तरेण ज्ञायते यत् प्रश्नस्य आशयः कारके इति संज्ञानिर्देशः इति कथं ज्ञायते इति। संज्ञिनिर्देशः कर्तव्यो न वा इति प्रश्नस्य उत्थापनं तु परं क्रियते भाष्यकारेण। तदेव यदि अस्य आशयः स्यात् तर्हि उत्तरत्र कारके इति संज्ञानिर्देशश्चेत् संज्ञिनो निर्देशः इति युक्तं न स्यात्। अतः कैयटमतमेव प्रकृते युक्ततरं भाति मे। किञ्च प्रथमायाः भाव्यमानविभक्तित्वखण्डनमपि न प्रबलम्। नाभि नभं च इत्यस्य वार्तिकत्वात्।*


### उपोद्घातः

महाभाष्यप्रदीपव्याख्यानानि इति ग्रन्थः एम्. एस्. नरसिंहाचार्यैः त्रिसप्तत्यधिक-नवदशतमे ईशवीयाब्दे सम्पादितः पण्डिचेरीस्थ-फ्रेन्च-इन्स्टिटिउट्-संस्थाद्वारा प्रकाशितः। अस्मिन् ग्रन्थे महाभाष्यप्रदीपयोः प्रायः नव व्याख्यानानि वर्तन्ते। तेषु महाभाष्यसिद्धान्तरत्नप्रकाशः इत्याख्या व्याख्या विशिष्टा। अस्य ग्रन्थस्य कर्ता श्रीहरिहरेन्द्रभगवत्पादशिष्यः श्रीशिवरामेन्द्रसरस्वती-योगीन्द्रः। तेषां विषये तथा अधिकं तथ्यं न लभ्यते। युधिष्ठिरमीमांसकानां मते एतेषां कालः १६०० वर्षात् परमस्ति। ततोऽधिकम् एतेषां विषये नोपलभ्यते।

इदं व्याख्यानम् अन्येभ्यः व्याख्यानेभ्यः नितरां विलक्षणं वर्तते। व्याख्यानानि सामान्यतः व्याख्येयग्रन्थार्थप्रकाशाय प्रवर्तन्ते। तत्रत्यानां पङ्क्तीनाम् आशयप्रकाशनं कुर्वति क्वचित् मतभेदे सति तम् अंशम् उल्लिखति। किन्तु भाष्यव्याख्याभूतः अयं ग्रन्थः न तथा। अस्य प्रदीपखण्डने एव महती रुचिः। प्रायः प्रतिपङ्क्तौ प्रदीपस्य खण्डनमेव दृश्यते। भाष्यपङ्क्त्यर्थं स्वमतानुकूलेन व्याख्याय ततःपरं तद्व्याख्याभूतप्रदीपपङ्क्तीम् उद्धृत्य खण्डयति व्याख्याकारः। अस्मिन् पत्रे मया कारके इति सूत्रविषये तेषाम् आचार्याणां यत् मतं तस्य युक्तायुक्तविचारः क्रियते।

### सूत्रस्य सामान्यः अर्थः

"कारके" इति षड्विधेषु पाणिनीयसूत्रेषु अधिकारसूत्रम्। कारके इति सप्तम्यन्तं पदम्। सप्तम्याः यद्यपि सामान्येन अधिकरणादिषु अर्थेषु विधानं, प्रकृते तु प्रथमार्थे एव सप्तमीति स्वीक्रियते। अर्थात् कारकमित्यस्य योऽर्थः स एव कारके इत्यस्यापि। किं नाम कारकम् इत्यत्र यद्यपि आचार्येषु मतवैविध्यं दृश्यते तथापि करोतीति कारकमिति भाष्यमतानुसारं क्रियानिष्पादकस्य कारकत्वं फलति। कारकमिति महासंज्ञाबलात् इदं सूत्रं संज्ञासूत्रमपि। एवञ्च कारके इति संज्ञाधिकारः इति फलितम्।

### भाष्यस्थस्य किमिदमिति प्रश्नस्य कैयटकृताशयखण्डनम्

"कारके" (पा.सू. १-४-२३) इति सूत्रे भाष्ये आदौ एव भाष्यकारेण प्रश्नः कृतः यत् किमिदमिति। तत्र किमिदमिति प्रश्नस्य आशयं प्रतिपादयति कैयटः-

(१) "सप्तमीनिर्देशान्न तावत् संज्ञात्वेनाधिकारः, संज्ञायाः भाव्यमानत्वेन प्रथमान्तनिर्देशस्य न्याय्यत्वात्। (२) अथ विशेषणत्वेनाधिकारः, तदा कारकाद्दत्तश्रुतयो-रेवाशिषि इत्यादावपादानादिसंज्ञा-विकलस्य अपि कारकस्य ग्रहणं स्यात्। षड्विधस्यैव चेष्यते। तद्व्यतिरिक्तं च कारकमस्ति, यथा नटस्य शृणोतीति प्रश्नः"।

अस्य च अयम् आशयः- (१) तत्र "कारके" इति अधिकारसूत्रम्। कीदृशः अधिकारः इति चेत् संज्ञाधिकारः। पाणिनीयशास्त्रे यत्र यत्र संज्ञानिर्देशः प्रायः सर्वत्रैव प्रथमान्तेन निर्देशः दृश्यते, यथा "वृद्धिरादैच्" इति। प्रकृते वृद्धिरिति संज्ञा विधीयते अथवा भाव्यते। भाव्यमानस्य च प्रथमान्तेनैव निर्देशः कर्तव्यः। अतः वृद्धिः इत्यस्य प्रथमान्तेन निर्देशः कृतः। तथैव "कारके" इत्यत्र यदि संज्ञानिर्देशः तर्हि प्रथमान्तेन निर्देशः कर्तव्यः आसीत् कारकमिति। किन्तु सप्तम्यन्तेन निर्देशः कृतः।

(२) किञ्च "कारके" इति यदि विशेषणत्वेन अन्वेति इति उच्यते अर्थात् कारके इति विषयसप्तमी। तस्य च क्रियायाम् इत्यर्थः। तच्च उत्तरत्र विशेषणत्वेन अन्वेति। तेन क्रियायां यद् ध्रुवं तस्य अपादानसंज्ञा भवति इत्यर्थः इति चेन्न। तथा चेत् कारकाद्दत्तश्रुतयोरेवाशिषि इत्यत्र अपादानादिकारकविशेषात् अन्यत्रापि स्यात्। अर्थात् षष्ठ्यादौ अपि अस्य प्रवृत्तिः स्यात्। यथा नटस्य शृणोतीति। अतः कारके इति विशेषणत्वेनापि अन्वेतुं न शक्नोति। अतः कारके इति संज्ञानिर्देशे विशेषणत्वेन निर्देशे च दोषात् कीदृशः अयं निर्देशः इति प्रश्नकर्तुः आशयः इति कैयटः।

रत्नप्रकाशकारः कैयटकृतस्य किमिदमिति प्रश्नकर्तुः आशयस्य सर्वथा खण्डनं कृतवान्। रत्नप्रकाशकारः कथयति- "करोति क्रियामिति कारकं, साधनमित्यर्थः। तत्र प्रथमार्थे व्यत्ययेन सप्तमी। सेयमपादानादिसंज्ञकानाम् अन्वर्था संज्ञाधिकृता। तदेतावदविद्वान् पृच्छति किमिदमिति। कस्य अयं निर्देश इत्यर्थः" इति। अस्यायमाशयः- कारक इति संज्ञाधिकार एव। किन्तु कश्चित् तं विषयम् अजानन् एव पृच्छति कारके इति कीदृशः निर्देशः इति। एवञ्च कस्यचिदज्ञस्य अयं प्रश्नः न तु दोषविदः इति।

ततः परं ग्रन्थकारः कैयटं प्रतिपङ्क्ति उद्धृत्य खण्डयति। यथा - यदुक्तं कैयटेन- सप्तमीनिर्देशात् न तावत् संज्ञात्वेनाधिकारः, संज्ञायाः भाव्यमानत्वेन प्रथमान्तनिर्देशस्य न्याय्यत्वात् इति। तेन एवं खण्डितम्। भाव्यमाना विभक्तिः सर्वदा प्रथमा एव स्यात् इत्यत्र नास्ति नियमः। प्रथमाभिन्नापि विधीयमाना विभक्तिः दृश्यते। यथा "नाभि नभं च" इति सूत्रे नाभिशब्दस्य नभादेशः विधीयते। तच्च द्वितीयान्तम्। अतः तत्कारणं न भवितुमर्हति। एवमेव विशेषणत्वेन क्रियापरस्य कारकशब्दस्य अन्वये यदुक्तं "कारकाद्दत्तश्रुतयोः.." इत्यादि तदपि खण्डितम्। यतो हि व्याख्यानतः तत्र विशेषप्रतिपत्तिः भवितुमर्हति। का व्याख्या इति चेत् कारके इति स्वरितनिर्देशात् तस्य अधिकारत्वम्। अधिकारशब्दस्य च भाष्यादौ अधिकं कार्यमित्यर्थः प्रतिपादितः एव। अर्थात् "कारके" इति स्वरितनिर्देशात् कारकसामान्यात् न, अपि तु अपादानादि-कारकविशेषादेव इति अधिकं ज्ञानं भविष्यति। अतः तदपि न कारणं प्रश्नस्य। एवञ्च प्रश्नकर्तुः आशयः यथा प्रतिपादितः कैयटेन सः सर्वथा खण्डितः।

**कारके इत्यत्र प्रथमाभावे कैयटाशयखण्डनम्**

कैयटेन प्रश्नकर्तुः यथा आशयः प्रतिपादितः तदनुसारेणैव संज्ञानिर्देशः इति भाष्यस्थोत्तरस्यापि व्याख्यानं कृतम्- "सुपां सुपो भवन्तीति प्रथमायाः स्थाने सप्तमी कृतेति भावः"। अर्थात् "कारके" इत्यत्र संज्ञानिर्देशश्चेत् प्रथमा स्यात्, किन्तु अत्र सप्तमी दृश्यते। तत् कथमिति चेत् प्रकृते सुब्व्यत्ययः अस्ति। अर्थात् "सुपां सुलुक्....." इत्यादिना सु इति प्रथमायाः स्थाने ङि इति सप्तमी अस्ति। अर्थात् तस्या अपि प्रथमार्थ एव। तेन च सज्ञानिर्देशः सिद्धः। तत्र "सुपां सुलुक्....." इत्यस्य स्थाने सुपां सुपो भवन्तीति वक्तव्यमिति काशिकाकारः। तन्मतमेव कथयति कैयटः सुपां सुपो भवन्तीति इति।

तच्च खण्डितम्। यतो हि कारके इति संज्ञानिर्देशः इह हि व्याकरणे इति भाष्यवचनेनैव ज्ञायते। अर्थात् व्याकरणे तादृशाः शब्दाः प्रयुज्यन्ते, ये लोके प्रसिद्धाः। यथा संख्या, अतीत इत्यादि। अथवा कृत्तिमाः शब्दाः प्रयुज्यन्ते। यथा टि, घु इत्यादि। किन्तु ध्रुवम् इत्यादयः ये शब्दाः, ते न लोके प्रसिद्धाः नापि कृत्तिमाः। तर्हि एते कीदृशाः इति चेत् अन्ततः संज्ञाशब्दाः इत्येव वक्तव्यम्। अतः संज्ञात्वज्ञानार्थं प्रथमान्तनिर्देशस्य आवश्यकता नास्ति। अतः महाभाष्योक्तवचनं तस्य संज्ञात्वप्रतिपादकपरं न तु सुब्व्यत्ययसूचकमिति भावः।

**संज्ञिनिर्देशे प्रदीपरत्नप्रकाशौ**

"कारके" इति संज्ञानिर्देशश्चेत् संज्ञिनो निर्देशः इत्यत्रापि प्रदीपरत्नप्रकाशयोः आशयभेदः दृश्यते। किमर्थमयं प्रश्नः इत्यत्र प्रदीपस्याशयस्तावत्- "कारके" इति अधिकारसूत्रम्। तस्य च "ध्रुवमपायेऽपादानमि"त्यादौ अधिकारात् ध्रुवादिकं संज्ञित्वेन लब्धुं शक्यते। तर्हि अयं प्रश्नः कुतः इति चेत् प्रकृते ध्रुवमिति सामान्यं संज्ञी। इष्टं तु विशिष्टः संज्ञी। अर्थात् यत् क्रियायाः साधकं ध्रुवं तस्य कारकमिति संज्ञा इत्येवमेव इष्टम्। अतः साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यमिति प्रदीपाशयः।

रत्नप्रकाशकारस्तु एतत् नाङ्गीकरोति। तेषाम् आशयस्तावत्- "कारके" इति सूत्रात् पूर्वं यानि संज्ञासूत्राणि विद्यन्ते तेषु सर्वेषु संज्ञिनिर्देशः अस्ति। किन्तु प्रकृते नास्तीत्यतः अत्र संज्ञानिर्देशः कर्तव्यः इत्येतावन्मात्रम्।

विशिष्टस्य संज्ञिनः अलाभात् संज्ञिनिर्देशः कर्तव्यः इति आशयः प्रदीपेन स्वबुद्धिकौशलेन प्रतिपादितः इति मे मतम्। अत्र सामान्यः संज्ञानिर्देशः कर्तव्यः, न तु विशिष्टसंज्ञिनिर्देशः। भाष्यकारेण स्वयं तस्य उत्तरं दत्तम्- "साधकं निर्वतकं कारकसंज्ञं भवतीति वक्तव्यमि"ति। एतेन अस्य प्रश्नस्य सामान्यसंज्ञिनिर्देशे एव तात्पर्यं न तु विशिष्टसंज्ञिनिर्देशे इति वक्तुं शक्यते। अतः तावत् दूरचिन्तनम् अत्र न युक्तम् इति मे मतिः। अतः रत्नप्रकाशकारस्य आशयः अत्र युक्ततरः।

**संज्ञिनिर्देशाभावे दोषविचारः**

संज्ञिनिर्देशाभावे ग्रामस्य समीपादागच्छतीत्यादौ अकारकस्य ग्रामस्यापि अपादानत्वं स्यात्। कथं ग्रामस्य अपादानता इत्यत्र कैयटस्य आशयस्तावत्- यथा शाखायाः पत्रं पतति चेदपि वृक्षात् पत्रं पततीति व्यवहारः भवति तथैव ग्रामस्य समीपात् यः आगच्छति सः ग्रामादपि आगच्छीति ग्रामस्य अपादानत्वं स्यात्। तदर्थं साधकं कारकमिति संज्ञिनिर्देशः कर्तव्यः। संज्ञिनिर्देशे तु ग्रामस्य अकारकत्वात् न अपादानत्वमिति कैयटः।

रत्नप्रकाशकारः अन्यथैव प्रतिपादयति। तेषां मते संज्ञिनिर्देशाभावे ध्रुवमात्रस्य अपादानसंज्ञा स्यात्। अर्थात् अकारकस्यापि ध्रुवस्य अपादानत्वं स्यात्। तेन ग्रामस्य समीपादागच्छतीत्यत्र समीपस्येव ग्रामस्यापि ध्रुवत्वाविशेषात् तस्यापि अपादानत्वं स्यात्। अतः संज्ञिनिर्देशः कर्तव्यः। तेषां मते कैयटोक्तं न युक्तम्। यतो हि कैयटेन यो वृक्षशाखादृष्टान्तः प्रदत्तः तयोः अवयवावयविनोः अभेदेन व्यवहारात् तथा सम्भवति अपि ग्रामसमीपयोः तथाभावात् न युक्तम्।

अस्य समाधानपरभाष्यस्य आशयः प्रदीपेन यथा उपस्थापितः तस्यापि खण्डनं रत्नप्रकाशकारेण कृतम्। एवं प्रायः नवतिप्रतिशतं विशेषतः कैयटस्य आशयम् अयम् आचार्यः खण्डयति।

**समीक्षा**

प्रश्नोत्तरात्मिकया शैल्या रचितं भाष्यम्। तत्र प्रश्नानां कर्ता भगवान् पतञ्जलिः स्वयम् अथवा तच्छिष्यः इति भवितुमर्हति। प्रश्नकर्ता यः कोऽपि भवतु उत्तरं तु भगवता स्वप्रश्नानुसारम् अथवा शिष्यकृतप्रश्नस्याशयम् अवबुध्यैव प्रदत्तम्। यदि केवलं प्रश्नाः एव स्युः तर्हि मादृशाः तदाशयावगतौ समर्थाः नापि स्युः, किन्तु तदुत्तराण्यपि प्रदत्तानि, तेन उत्तरानुसारं वयम् अनुमातुं शक्नुमः यत् तस्य तस्य प्रश्नस्य आशयः कः इति। रत्नप्रकाशकारेणाधिकतया कैटककृतभाष्य-प्रश्नाशयः एव खण्डितः। अतः अयं प्रसङ्गः मयोत्थापितः। यद्यपि सम्पूर्णं ग्रन्थं यदि पश्यामः क्वचिद् कैयटखण्डनस्य अयुक्तत्वात्, तत्खण्डनस्य दौर्बल्यदर्शनाच्च कैयटखण्डनबुध्यैव ग्रन्थकारः प्रवृत्तः इति वक्तुं शक्यते। यथा- "कारके" इत्यत्र "किमिदमि"ति प्रश्नस्य उत्तरत्वेन भाष्यकारेण उक्तं संज्ञानिर्देशः इति। अर्थात् "कारके" इत्यनेन कारकसंज्ञानिर्देशः क्रियते। ततः पुनः प्रश्नः कृतः यत्- "किं वक्तव्यमेतदि"ति। तस्य उत्तरं दत्तम्- "न हि, इह हि व्याकरणे" इत्यादि। किं वक्तव्यमेतद् इति प्रश्नः कुतः उद्भूतः इत्यत्रैव कैयटरत्नप्रकाशकारयोः मतभेदः। कैयटस्य आशयः- "यत्र यत्र संज्ञापदनिर्देशः तत्र तत्र प्रथमान्तेनैव निर्देशः दृश्यते" इति प्रश्नस्य बीजम्। "कारके" इति तु सप्तम्यन्तमिति तस्य पृथक् निर्देशः कर्तव्यो न वा इति प्रश्नाशयः। रत्नप्रकाशकारस्य तु एतावत् पर्यन्तं यत्र यत्र संज्ञानिर्देशः तत्र तत्र संज्ञिनिर्देशः। कारके इत्यत्र संज्ञामात्रनिर्देशात् प्रश्नः जायते इति। किं प्रकृतेऽपि संज्ञिनिर्देशः कर्तव्यः न वा इत्येव प्रश्नाशयः इति फलति। किन्तु रत्नप्रकाशकारेण यथा प्रतिपादितं तन्न युक्तमिति मे मतम्। यतो हि भाष्यकारेण न हि, इह हि व्याकरणे इत्यादिना उत्तरेण ज्ञायते यत् प्रश्नस्य आशयः कारके इति संज्ञानिर्देशः इति कथं ज्ञायते इति। संज्ञिनिर्देशः कर्तव्यो न वा इति प्रश्नस्य उत्थापनं तु परं क्रियते भाष्यकारेण। तदेव यदि अस्य आशयः स्यात् तर्हि उत्तरत्र कारके इति संज्ञानिर्देशश्चेत् संज्ञिनो निर्देशः इति युक्तं न स्यात्। अतः कैयटमतमेव प्रकृते युक्ततरं भाति मे। किञ्च प्रथमायाः भाव्यमानविभक्तित्वखण्डनमपि न प्रबलम्। नाभि नभं च इत्यस्य गणसूत्रत्वात्।

**सहायक**ग्रन्थाः

- आचार्युलु के. वि. रामकृष्णः। *भूषणसारतत्त्वप्रकाशिका।* २०१०। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्।
- नागेशः। *लघुशब्देन्दुशेखरः(कारकप्रकरणम्)।* २००२। तेजःपालशर्मा(सम्पा०)। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।
- पतञ्जलिः। *महाभाष्यम्(हिन्दिव्याख्यासहितम्)।* २००८(तृ.सं)। मीमांसकः युधिष्ठिरः(व्याख्याता)। रेवली : रामलाल कपूर ट्रस्ट।
- पतञ्जलिः। *व्याकरणमहाभाष्यम् (प्रदीपोद्यतसहितम्)।* १९९८। शर्मा शिवदत्तः(सम्पा०)। दिल्ली : चौखम्बसंस्कृतप्रतिष्ठानम्।
- भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (प्रथमाभागः)।* १९६१(प्र. सं)। शर्मा परमेश्वरानन्दः(सम्पा०)। वाराणसी : मोतीलाल वनारसीदास।
- *महाभाष्यप्रदीपव्याख्यानानि (चतुर्थभागः)।* १९७८(प्र.सं)। नरसिंहाचार्यः, एम्. एस्. (सम्पा०)। पण्डिचेरी : फ्रेञ्च इन्स्टिटिउट्।